THE ORIENTAL THOUGHT SERIES

General Editor:—
Dr. G. V. Devasthali
M. A., B. T., Ph. D

No. 2

मधुराम्लकाव्य of भास्करराय

Edited by:—
Dr. G. V. Devasthali
M. A., B. T., Ph. D.

NASIK, January, 1955.

Introduction.

The Madhurāmla-kāvya of Bhāskararāya, better known as Bhāsurānandanātha, is being placed here before the reader for the first time through the Oriental Thought Series under No. 2.

The text is edited here with the help of the only manuscript that was available to me. While preparing a paper[1] on Jagannātha Paṇḍita alias Umānandanātha, a disciple of Bhāskararāya, I had collected ample material and information about this latter also. I had also an occasion or two of contacting the late Godbole Maharaj who was well known as a spiritual descendant of our author. It was from him through an old pupil of mine that I had secured a MS. of the Madhurāmla-kāvya. I had also had the good fortune to discuss with him some points concerning Bhāsurānandanātha and his works. He assured me that the present MS. is complete, though, I still feel, that there is a gap (whatever be its extent) between the last two folios of our MS.

The author's father Gambhīrarāya has an illustrious pedigree both on the side of his father as well as that of his mother The names of his ancestors on his mother's side are Mudgala, Nārāyaṇa, and Aṇṇājī, while Nārāyaṇa is the name of his maternal uncle who was also his guru[2]. Ekanātha, and Tukadeva are the names of his great-grand-father and grand-father respectively; while those of his father and mother are Yamājī Paṇḍita and Candramāmbā[3]. He was in the service of the sultan of Bijapur, had

---

1 See Dr. Kunhan Raja Presentation Volume pp. 271-284.

2 Read:- मन्मातुःप्रपितामहो हि भिषजां वर्यो बुधो मुद्गलः
श्रीवत्सान्वयसम्भवो गुणनिधिर्नारायणस्तत्सुतः ।
तस्याण्णाजिबुधः सुतः किल पुनर्नारायणस्तत्सुत-
स्तं वन्दे गुरुमागमांश्च सकलान् योऽध्यापयन् मातुलः ॥

3 Read:- तद्गोत्रोद्भव एकनाथ इति च श्रीमानुदारः शुचि-
स्तत्पुत्रस्तुकदेवपण्डित इति प्रौढः प्रतापोच्छ्रितः ।
तत्सूनुश्च यमाजिपण्डित इति ख्यातः सतां संमतो
जाया यस्य सती सतीजननुता स्याच्चन्द्रमा नामतः ॥
दमवांश्चन्द्रमाख्यायां यमाजिर्यमजीजनत् ।
स सूरिशिक्षादीक्षावान् कविर्गम्भीरभारती ॥

(Introductory verses from विष्णुसहस्रनामपद्यप्रसूनाञ्जलि of गम्भीरराय quoted in the NSP. 1935 edition of ललितासहस्रनाम with सौभाग्यभास्कर by भास्करराय, p. 8.)

composed several excellent works, had performed several sacrifices and passed the last days of his life at Benares[4].

Gambhīrarāya was married to Konamāmbā from whom he had two sons, Sakhārāma and Bhāskara. The former, who is the elder, does not appear to have attained any great scholarship, though we know for certain that he composed a short commentary -- called Choṭī Vṛtti -- on Piṅgala's Chandaḥ sūtra wherein, he declares, he has stated in brief what has been stated and discussed at great length by his father in his Vārtikarāja and by his younger brother (i. e. our author) in his Bhāṣya-rāja[5].

Our author Bhāskara was born at Bhāgānagarī[6] and is said to have been a resident of the Āndhradeśa. For some years he appears to have stayed at Benares where also he

---

4 Read:- प्रख्यातो विजयापुरीनरपतेर्यः सेवया फारशी-
भाषाष्टादशपर्वभारतकृतिं सर्वां विपर्यासयत् ।
आचान्ताखिलशास्त्रवारिधिमिमं दृष्ट्वैव वाचंयमाः
पाराशर्यकणादजैमिनिमुखा अद्यापि चान्तर्हिताः ॥
यः शास्त्राम्बुनिधीन् प्रमथ्य कृतवान् ग्रन्थाननन्योपमान्
अग्निष्टोममुखैर्मखैः सुरपतिं तुष्टं गृहेऽवासयत् ।
यः काश्यां चरमायुरौज्झदमलः साम्बादभेदेन तं
तातं भारतिदीक्षितोत्तरपदं गम्भीरराजं नुमः ॥

Quoted from भास्करराय's छन्दःकौस्तुभ in the ललितासहस्रनाम p. 7 (referred to above)

5 Read:- गम्भीरयज्वनः पुत्रो भास्कराग्निचितोऽग्रजः ।
सखाराममखी छन्दो वेदाङ्गं व्याचिकीर्षति ॥
पित्रा वार्तिकराजे यद् भाष्यराजेऽनुजेन च ।
उक्तं तदेव संगृह्य छोटीं वृत्तिं करोम्यहम् ॥

Descriptive Catalogue of SK. MSS. in the Adyar Library. Vol. I, No. 701, p. 252. Also read the following which is found on page 253 there:-

क्षुण्णे वार्तिकराज एव विवृते भाष्याधिराजेन च
छन्दःसूत्रशतत्रये किमधिकं लेख्यं बुधैः कैरपि ।
ताभ्यामेव परिष्कृतान् कतिपयानर्थानुपादाय तु
छोटीं वृत्तिमचीकरद् भुवि सखारामाभिधो दीक्षितः ॥

इति श्रीमद्भारत्युपाख्यश्रीमद्गम्भीरराजदीक्षितसूरिसूनुना सखारामदीक्षितेन कृतायां वेदाङ्गछन्दःसूत्रछोटीवृत्तावष्टमोऽध्यायो ग्रन्थश्च समाप्तः ।

6 cf. प्रादुर्भूतः सैष भागानगर्यां (भास्करविलास st. 7).

composed several of his works[7]. But again he seems to have returned to the Coladeśa and stayed there on the bank o the Kāverī or Kṛṣṇā at least for a few days[8]. From several references in his works again it is possible to surmise that he must have travelled all over India from Kāmarūpa (i. e. Asam) in the east to Gāndhāra in the west and from Kedāra in the north to the Setu (i. e. Rāmeśvara) in the south .

He was a śaiva and a great tāntrika, though he has also paid obeisance to Viṭṭhala once[10]. It is more interesting, however, to note that his kuladaivata is Bhramariṇī or Candralā in the Saṁnatikṣetra on the bank of the river Bhīmā[11], where he also raised a temple in her honour[12].

That Bhāskara was a great scholar, well up not only in the tantravidyā but also in several other sciences such as dharma-śāstra, nyāya, mīmāṁsā, vyākaraṇa, and chandaḥśāstra

---

7 cf. काश्यां जज्ञे सोमपीथी यथावत् कालं कंचित्तत्र कृत्वा विहारम्
(भा. वि. st. 33)

8 cf. काश्याश्चोलान्देशमेत्य कावेर्यैककविहारिणा ।
नाथेन भासुरानन्दनाथेहास्मि योजितः ॥
(Statement of उमानन्दनाथ in his नित्योत्सवनिबन्ध); Also read:-
शिष्यस्यासौ चन्द्रसेनस्य राज्ञः सेवातुष्टयोवास कृष्णोपकण्ठम् ।
(भा. वि. st. 33, the चन्द्रसेन referred to here is चन्द्रसेन, the son of धनाजी जाधव).

9 cf. मधुराम्लकाव्य, st. 5

10 cf. श्रीमद्विठ्ठलमानम्य गम्भीराध्वरिसूनुना etc. Intro. stanza of the तान्त्रिकहोमविधि.

11 cf. अधिभीमरथीतीरमस्माकं कुलदैवतम् ।
वन्दे विठ्ठलमम्बां च चन्द्रलां परमेश्वरीम् ॥ Desc. Cat Adyar, Vol. I, p. १६१. Also cf. या नन्दादिषु सप्तमी भ्रमरिणी भीमातटे सन्नति-
क्षेत्रे नः कुलदेवता वसति सा श्रीचन्द्रला प्रीयताम् ॥
concluding stanza of भास्करराय's गुप्तवती. See Devasthali, Desc. Cat. of SK. & PK. MSS. in Bom. Uni. Library, No. 1357

12 cf. सन्नतिमाम्नायपद्योः संनतिनाम्नेह विश्रुते क्षेत्रे ।
चक्रे स मन्दिरं श्रीचक्राकारेण चन्द्रलाम्बायाः ॥ (भा. वि. st. 17)

is shown not only by the various epithets which have been used to describe him, but also by a glance through the list of works composed by him which is given below. It was, therefore, but natural that such an illustrious personality should have several disciples. The most erudite and famous of these appears to be Umānandanātha[13] (or Uttamānandanātha), the author of the famous tantra work, Nityotsavanibandha. This Umānandanātha; before receiving his order from our author, was well-known as Jagannātha Paṇḍita, a famous Mahārāṣṭrīya scholar, author of several works such as the Rati-manmatha, Hṛdayāmṛta, and the Bhāskaravilāsa. His full name in the present day style with the surname at the end is Jagannātha Bālakṛṣṇa Śrutapeṭave; and his father, we are told, was a minister of Sarapharaja Bhosala of Tanjore.

Raghunātha Bālakṛṣṇa Devasthalī of Savanta Wadi is another disciple of our author. He is known to have composed two works viz. Jātiviveka, and Durjana-rasanārgala (composed in 1736A.D.[14]). He also appears to have been a great scholar. Gaṇeśa Dīkṣita[15] (alias Umāpatyānandanātha) and Nārāyaṇa Deva[16] are two more of his Disciples, about whom, however, we know almost nothing beyond their names. It has further to be observed that our author had among the galaxy of his disciples and devotees two more persons[17] well-known in the Maratha history. The first is Candrasena Jādhava, the son of Dhanājī, (the commander of Shāhū) and the second is his son Rāmacandra.

---

13 For this Umānandanātha, his life, date and works see my paper entitled ' Jagannāthapaṇḍita alias Umānandanātha ' in C. Kunhan Raja Presentation Volume, .

14 cf. Devasthali, Desc. Cat. of SK, & PK, MSS, in Bom. Uni. Library, Nos. and 2316

15 See ललितासहस्रनाम with भास्करराय's भाष्य on it (NSP edition of 19.5.) p. 15

16 ibid, p. 9

17 cf. भा. वि. st. 33 and also ललितासहस्रनाम (ibid) p. 9. In fact उमानन्दनाथ declares that there was no क्षितीश who was not a discipl of भास्करराय cf. यस्यादासो विद्यते न क्षितीशः (भा. वि. st. 17).

If Bhāskararāya had several disciples, he himself was a disciple of more teachers than one. Nṛsiṁhānandanātha (or Narasiṁhānandanātha as he is otherwise called) imparted instructions to our author in the Vidyās and Mantras[18]. Prior to his initiation this Narasiṁha was known as Narasiṁha Yajvan, son of Ahobala; and was himself a great Paṇḍita, and a staunch opponent of the Mādhvas[19]. We know that he had composed a work called the Paribhāṣāmaṇḍala[20] on the Lalitāsahasranāma. From a verse[21] in the Bhāskaravilāsa it appears that Bhāskararāya had learnt gauḍa-tarka (i. e. navyanyāya) under one Gaṅgādhara Yajvan. Besides these two, our author had one more guru from whom he got his dīkṣā. The name of this guru is Śivadatta Śukla[22] who after his initiation was known by the name Prakāśānandanātha.

Coming now to the date of our author it is well-known that he had composed several works between 1729 and 1740 A. D. From the known dates of some of these compositions (noticed in the list in a subsequent section) it may be easily.

---

18 cf. विद्यानां च मनूनां मनुसंख्यानां च विज्ञानाम् ।
उपदेष्टा जयतितरां नरसिंहानन्दनाथगुरुः ॥ (महात्रिपुरसुन्दरीवरिवस्याविधि, Intr. st. 2 see Desc. Cat. of SK & PK. MSS in Bombay University Library. p. 614, No. 1785. Also read:- विद्याष्टादशकस्य मर्मभिदभवः श्रीनृसिंहाद् गुरोः (ibid. p. 593, No. 1739). Also cf. मधुराम्ल॰ st 43

19 भास्करराय himself has given us greater details about his गुरु नृसिंहानन्दनाथ while explaining the introductory verse of his own वरिवस्यारहस्य.

20 The forty stanzas comprising this work are cited and explained by भास्करराय in his सौभाग्यभास्करः on the ललितासहस्रनाम. The last verse of this work is:-

इति परिभाषामण्डलमुदितं नरसिंहयज्वना विदुषा ।
सत्सम्प्रदायगमकं शिवभक्तानन्दनाय शिवम् ॥

(NSP ed. of 1935, p. 239)

21 cf. स एष गङ्गाधरवाजपेयिसकाशतः साधितगौडतर्कः । (भा. वि. 20)

22 cf. शिवदत्तशुक्लचरणासादितपूर्णाभिषेकसाम्राज्यः । (भा. वि. ३०); Also read:- यश्च श्रीशिवदत्तशुक्लचरणैः पूर्णाभिषिक्तोऽभवत् । (Intr. stanza of भास्करराय's सेतुबन्ध, Desc. cat. of SK & PK MSS in Bom. Uni. Library No 1739)

surmised that the literary activity of our author must have extended between 1700 and 1750 A. D. approximately. For from a statement[23] in the Bhāskaravilāsa again it is possible to guess that Bhāskararāya was added to the majority in 1750 A.D. It is also well-known that Bhāskararāya's disciples composed some of their works in 1736, 1742 and 1745 A. D.

As for the works of Bhāskararāya it should be observed that he is known to have composed sixty-seven works in all, out of which thirty-one are commentaries and the rest are independent works. The classified list of works given below will show that our author composed commentaries on eight Upaniṣats, four Vedānta Treatises, elven Tantra works, and Stotras, two Vyākaraṇa works, three of Chandaḥśāstra, two of Mīmāṁsā, and one of Dharmaśāstra. Similarly among his independent works there are thirteen Tantra works, five Stotras, two works on Vedānta and Mīmāṁsā each, one Nyāya work, five works on Dharmaśāstra, two on Prosody, one on grammar and two works on some Vedic topics.

All the foregoing information -- very briefly stated as it is -- must be enough to convince the reader of the greatness of Bhāskararāya as a man and also as a scholar and a tāntrika. Full details about his pedigree (or ancestors), his own erudition, travels, disciples, and a critical appreciation of his works and on the basis of all this a clear but full statement of his views (doctrines) --- all this, though a desideratum as yet, lies beyond the scope of this Introduction. A few lines in appre-

---

23 cf. कुमुदं वर्धयन् पद्मोल्लासी कोऽप्येव भास्करः ।
दुन्दुभिं ध्वनयन्नुर्व्यां प्रमोदी दिन(व?) मानशे ॥ (For a soussion regarding this verse see my paper in the C, Kunhan Raja Presentation Volume, p. 27 / f. In the very next stanza again we are told that भास्करराय laid down his mortal coits at मध्यार्जुन, a holy place on the bank of the सह्यसुता (i. e. the कावेरी) भा. वि. 109 & 110. The same idea appears to be covertly stated in the following stanza from the भा. वि. :—

साध्वी तदभ्यसुदती सह्यसुतातीरभूपरिष्कारे ।
भास्करपुरेऽग्रहारे बद्धावृति भास्करेश्वरं न्यषित ॥

ciation of the work[24] that is here being presented to the reader for the first time in print and some explanatory notes to facilitate understanding may be separately attempted through the pages of the Oriental Thought in the near future. In the meanwhile once again[25] I appeal to all the followers of Bhāsurānandanātha to supply me with any further pieces of information and also some MSS of Bhāskararāya's works in general and of the Madhurāmlakāvy ; in particular. Any help in any such direction will, it need n rdly be added, be gratefully accepted and acknowledged.

The Introduction may now be brought to a close with a classified list[26] of the works composed by Bhāskararāya alias Bhāsurānandanātha, along with the dates of the composition of some of them :---

[A] COMMENTARIES (31 in all).

(i) On the उपनिषत्s (8 in all):---

(1) कठोपनिषत्
(2) केनोपनिषत्
(3) जाबालोपनिषत्
(4) त्रिपुरोपनिषत् (=महोपनिषत्) (later than 1733 A. D.)
(5) मुण्डकोपनिषत्
(6) अथर्वणशिरोपनिषत्
(7) कौलोपनिषत् (later than 1733 A. D.)
(8) भावनोपनिषद्

---

24 For a brief appreciation of this work in Sanskrit see Oriental Thought Vol. 1 No. 1 pp. 78-80.

25 An appeal was already made in the last number in the Sanskrit appreciation of this work.

26 This list is prepared on the basis of information derived from Catalogus Catalogorum (Aufrecht), Descriptive Catalogue of SK. & PK. MSS in the Bom. Uni. Library (Devasthali), Descriptive Catalogue of MSS in India Office Library (Dr. Eggeling), Reports on SK. MSS in Southern India (Dr. Hultzsch), R. Krishnaswami Shastri's Introduction to the वरिवस्यारहस्य (Adyar Library, Adyar, 1941) and भास्करविलास (edited along with ललिता-सहस्रनाम NSP edition, 1935).

(ii) On Vedānta Works (4 in all):--

(1) अवधूतगीता
(2) अष्टावक्रगीता
(3) आत्मबोध
(4) ईश्वरगीता (=शिवगीता)

(iii) On Tantra Works and Stotras (11 in all):--

(1) गुप्तवती on the देवीमाहात्म्य (1740 A. D.)
(2) त्रिपुरामहिम्नटीका
(3) मञ्जूषा on the नाथनवरत्नमाला (later than 1737 A. D.)
(4) प्रकाश on the वरिवस्यारहस्य
(5) सेतुबन्ध on the नित्याषोडशीतन्त्र (1733 A. D.)
(6) सौभाग्यभास्कर on the ललितासहस्रनाम (1729 A. D.)
(7) चन्द्रलाम्बामाहात्म्यटीका
(8) खद्योत on the गणेशसहस्रनाम (earlier than 1740 A. D.)
(9) रत्नालोक on the परशुरामकल्पसूत्र (earlier than नित्योत्सवनिबन्ध i. e. 1745 A.D.)
(10) सौभाग्यचन्द्रोदय on the सौभाग्यरत्नाकर (earlier than नित्योत्सवनिबन्ध i. e. 1745 A.D)
(11) आलवाल on the शिवनामकल्पलता

(iv) On Other Works (8 in all):--

(a) व्याकरण (2 in all)
(1) रसिकरञ्जनी on the मध्यसिद्धान्तकौमुदी
(2) विलास on the सिद्धान्तकौमुदी

(b) छन्दःशास्त्र (3 in all) :—
(1) छन्दोभाष्यराज (=छन्दोभास्कर ?) (1737 A. D.)
(2) वृत्तचन्द्रोदय on अभिनववृत्तरत्नाकर (1730 A. D.)
(3) अमृतसंजीवनी on वृत्तरत्नाकर (c. 1700 A. D.)

(c) मीमांसा (only two):—
(1) भाट्टचन्द्रोदय on the भाट्टचन्द्रिका
(2) भाष्य on संकर्षकाण्ड

(d) धर्मशास्त्र (only one)
(1) सहस्रभोजनसूत्रव्याख्या

[B] INDEPENDENT WORKS (36 in all):--

i) Tantrika (13 in all):--

(1) चण्डीस्तवमन्त्रपरिच्छेद
(2) मन्त्ररत्नावली
(3) मन्त्रविभाग
(4) ललितार्चनविधि
(5) श्रीविद्यार्चनचन्द्रिका
(6) तृचभास्कर
(7) भावनोपनिषत्-प्रयोगविधि
(8) महात्रिपुरसुन्दरीवरिवस्याविधि
(9) तान्त्रिकहोमविधि
(10) वरिवस्यारहस्य
(11) शतश्लोकी
(12) प्रकाशवरिवस्याविधि (=वरिवस्याप्रकाश ?)
(13) त्रिपुरसुन्दरीबाह्यवरिवस्याविधि

ii) Stotras (5 in all):--

(1) नायनवरत्नमाला
(2) शिवस्तुति (=शिवस्तव)
(3) देवीस्तव
(4) शिवदण्डक
(5) कन्यकापुराण

iii) Kāvya (3 in all):--

(1) मधुराम्लकाव्य
(2) भास्करसुभाषित
(3) चन्द्रशाला

iv) Prosody (2 in all):--

(1) छन्दःकौस्तुभ
(2) अभिनववृत्तरत्नाकर

v) Dharmaśāstra (5 in all);--

(1) स्मृतितत्त्व
(2) शङ्खचक्राङ्कनप्रायश्चित्त
(3) एकादशीनिर्णय

(4) प्रदोषनिर्णय

(5) कुण्डभास्कर

(vi) Vedānia (2 in all)

(1) चण्डभास्कर

(2) नीलाचलचपेटिका

(vii) Mimāṁsā (2 in all):--

(1) भाट्टचन्द्रिका

(2) मीमांसावादकौतूहल

(viii) Nyāya (only one):--

(1) न्यायमण्डन

(ix) Grammar (only one).--

(1) शब्दकौस्तुभदूषण

(x) Vedic (2 in all):--

(1) वैदिककोश

(2) सामराजगानप्रयोग

॥ श्रीः ॥

श्रीभास्कररायविरचितं

मधुराम्लकाव्यम् ॥

शिवेति द्वौ वर्णौ परपदपतद्धंसगरुतौ
तटौ संसाराब्धेः स्वविषयकबोधाङ्कुरदले ।
श्रुतेरन्तर्गोपायितपररहस्यप्रुववरौ
घरट्टग्रावाणौ भवविटपिबीजौघदलने ॥ १ ॥

ऋणमिष्टमदत्त्वैव त्वन्नाम जपतो मम ।
शिवे कथमपर्णेति संज्ञां वोढुं न लज्जसे ॥ २ ॥

श्रीकालिदासमुखसत्कविभिः कृतानि
काव्यान्यतीव मधुराणि निपीय नृणाम् ।
जिह्वासु जाड्यमभवत्तदजामितायै
काव्यं करोति कविभास्कर ईषदम्लम् ॥ ३ ॥

वरफाणितपरिपाचितसहकारशलाटुशकलवच्छ्लोकाः
ग्राम्यैरविदितरूपा जयन्ति मधुराम्लकाव्यस्य ॥ ४ ॥

आ प्राचः कामरूपाद् द्रुहिणसुतनदप्लाविताद् प्रतीचो
गान्धारात् सिन्धुसान्द्राद्रघुवरचरिताद् च सेतोरवाचः ।
आ केदारादुदीचस्तुहिनगहनतः सन्ति विद्वत्समाजा
ये ये तानेष यत्नः सुखयतु समजान् कश्चमत्कर्तुमीष्टे ॥ ५ ॥

क्षुत्तृड्व्याधिनिपीडितत्रिजगतीरक्षार्थमन्नोदक-
स्यान्यस्माद् ग्रहणे न जातु सहतेऽप्यल्पं विलम्बं शिवः ।
गङ्गां मूर्ध्न्यत एव यो निजतनौ वामेऽन्नपूर्णां दधत्
सोऽयं नः करुणैकमूर्तिरवताद्देवो भवानीपतिः ॥ ६ ॥

अर्चामीति धिया भक्तो विध्यामीति धिया स्मरः ।
शिवे पुष्पं क्षिपन् सद्यो नपुनर्देहतामगात् ॥ ७ ॥

मोक्षस्यैकनिदानमब्जनयनब्रह्मेन्द्रचन्द्रादिभिर्
देवैः प्राणपदीकृतं कलिमलप्रध्वंसिधर्माङ्कुरः ।
भारत्यापि सुदुर्निरूपमहिम त्र्यन्तरे गोपितं
वक्तुर्मङ्गलदं शिवेति विमलं नामास्तु नः श्रेयसे ॥ ८ ॥

कृत्वा मालामनन्तां तदपरगलगां तत्स्फुटां स्कन्धयुग्माद्
आमुच्याऽधोऽधिनाभि प्रथमचरमयोर्वक्त्रयोर्मेलनेन ।
मुक्तेरत्रैलता किं तरल इह हरिग्रावकान्तिर्मुरारिर्
मेहस्तन्मध्यशीर्षोन्नमितवसुमतीत्युद्भ्रमोऽभूद् बुधानाम् ॥९

पादाघातधरोत्पतद्धरगरुद्भूतिभ्रमाद् वज्रिणा
यस्मिन्नभ्रमुवल्लभश्च भिदुरं भूयः परामृश्यते ।
भूमीभारभरेण भोगिभवनधस्यद्दृषद्भूरिशो
भद्रं पक्ष्मलयत्वघं च हरतु त्वत्ताण्डवाडम्बरः ॥ १० ॥

जगद्दाहासक्तं झटिति करमानीय दयया
निधायास्ये पश्चाज्जठरजगदण्डक्षयभिया ।
बहिस्त्यक्तुं वान्तर्गिलितुमपि वा नार्हमिति किं
धिया मध्येकण्ठं हर गरलमक्षेपि भवता ॥ ११ ॥

विकुण्ठो वैकुण्ठो गतधृतिरवात्सीच्छतधृतिः
प्रचेता निश्चेता निभृतमघवानास्त मघवा ।
कृतान्तोऽभूत्तान्तो भसितिभुवनं विश्वभुवनं
विलोले कालोके शिव शिव भवानेव शरणम् ॥ १२

शिरःस्थशशलक्षणं त्रिपुरदैत्यसंतक्षणं
दुरन्तविषभक्षणं सुरनिकायसंरक्षणम् ।
नरीनरविलक्षणं रविकृशानुचन्द्रेक्षणं
स्मरार्दनविचक्षणं परशिवं भजेऽनुक्षणम् ॥ १३ ॥

हासाभाटप्रतिश्रुत्कटकटितगुहास्फोटविस्फोटिताद्रि-
प्रत्रुट्यद्दण्डशैलप्रशिथिलधरणिप्रस्खलद्ग्रावकूटैः ।
फट्फट्पाटत्करोटिव्रजभुजगविनिद्राणविद्राणविष्णोर्
अव्यक्ता किं किमुक्तिर्द्विगुणयति कटाटङ्कृतेट्टाट्टहासम् ॥१४॥

बहुव्रीह्याशया द्वन्द्वैराविष्टः कर्मधारया ।
कदा तत्पुरुषं पश्यन्नव्ययीभावमाप्नुयाम् ॥ १५ ॥

गौरीपते विषयसौख्यमशेषमण्ड-
कण्डूयनोत्थसुखवत् परिणामदुःखम् ।
तन्मे विभो विषयदुर्मृगतृष्णिकाया
नाशाय देहि भवतो रसगन्धमीश ॥ १६ ॥

अन्नं ते गरलं गजाजिनमहो वस्त्रं श्मशान गृहम्
पात्रं मर्त्यकरोटिका पशुपते भृताः कुटुम्बस्तव ।
स्थाणुत्वेन मतिर्वृषध्वजतया धर्मो विरूपाक्षिभी
रूपं शूलितया बलं च कथितं गौर्याः कथं त्वं वरः ॥१७॥

वात्सल्यादभयप्रदानकरणादार्तार्तिनिर्वापणात्
कारुण्यादघशोषणादगणितश्रेयःपदप्रापणात् ।
सेव्यः श्रीपतिरेक एव जगतामेते यतः साक्षिणः
प्रह्लादश्च बिभीषणश्च करिराट् पाञ्चाल्यहिल्या ध्रुवः ॥१८॥

आनन्त्यौदार्यसत्यप्रियमृतिहृतिभिः स्वल्पसेवातितोषात्
सद्दृष्टोच्छित्त्युपेक्षाऽभयहितवचनैरुत्तमत्वाच्च शम्भुः ।
सेव्यो विष्णूपमन्युद्रुहिणमुनिसुतश्रीदमन्थेच्छुदेवैर्
दक्षश्रीरामवेदैराशिशुपशुवधूराक्षसैः साक्षिभिर्नः १९ ॥

ज्ञाते तत्पुरुषे तु तत्पुरुषति त्वन्नाम्नि शैवाग्रणीर्
अन्यः कोऽपि समाश्रयन्निह बहुव्रीहिं बहुव्रीहिभाक् ।
श्रीरामेश्वरकर्मधारयमुरीकुर्वन् कविर्भास्करः
कस्मादण्वपि कर्म धारयति किं द्वन्द्वेऽपि न द्वन्द्वति ॥२०॥

अद्याप्यस्ति विपश्चितामपि महत् संदेहकोटिद्वयम्
य: श्रुत्या जगदीश्वरो निगदित: सप्त: किमप्तोऽथ स: ।
तत्रेश: प्रथमैव कोटिरिति किं निश्चायनाय स्फुटम्
नाम्नैव प्रथितोऽभवत् परशिव: श्रीसप्तकोटीश्वर: ॥ २१ ॥

यस्य चेटीभवद्देवकोटीमणिप्रोथकोटीरत: पादपीठीवृता ।
सोऽयमाटीकितोद्दामपाटी कवेरास्यपेटीगत: सप्तकोटीश्वर: ॥ २२ ॥

पुण्यानां किरणाच्छिवोऽस्यघहृतेस्त्वं धौतपापाभिध:
कैवल्यैकसरस्वतीश भवति श्रेयोनुगं गायताम् ।
नष्टेना यमुनास्तवेन तरसा जात: कविर्भास्कर:
स्वादन्योऽपि तथैव येन सशिवा: पञ्चापि नद्य: स्मृता: ॥२३॥

पदक्रमविकम्पनप्लुतलसज्जटामण्डले
शिवे श्रुतिनिरुक्तसद्गुणगणेक्षणज्योतिषि ।
समृद्धिमनुजातके सुकृतिभिर्गते ध्येयताम्
मनो वसतु मे सदाचरणसार्थकच्छन्दसि ॥ २४ ॥

इन्दुज्वलनक्ष्वेडं सितशोणश्यामलं क्रमाद् दधता ।
सत्त्वरजस्तमसां किमु तरतमभावस्त्वयोपदिष्टो न: ॥ २५ ॥

कालानलसंयुक्तिर्गृहसुखमुक्ति: श्मशानभुवि सक्ति: ।
खरतरगरभरभुक्ति: फणिगणसक्ति: शिवोऽहमित्युक्ति: ॥ २६ ॥

रविकरकृतविकृतिना त्वन्मुखचन्द्रं श्रितेन चन्द्रेण ।
पार्दाकवदुर्दामभिरर्दितकिरणोत्कर: कपर्दस्ते ॥ २७ ॥

परशिव तव मुखशशिन: सप्तदशीयं कला शिरसि ।
षोडशकलेन शशिना कथमिव तुलयन्त्यमुं कवय: ॥ २८ ॥

भवता भवतापहृता रचिता यदि तात चिता भसिता ।
जनतादुरिताविरताभिहता कृकृता वरतारकितांगमिता ॥ २९ ॥

स्वार्थं परित्यज्य भवन्तमीश
स्तुवन् प्रशस्तान् लभते किलार्थान् ।
विधेर्निषेधस्य च शेषभूता
अत्रार्थवादा हि निदर्शनं नः ॥ ३० ॥

अवाप्तकामाय महेश तुभ्यं
किमन्नदानेन ततः स्तुवे त्वाम् ।
स्वशेषिणं स्तौति पुनर्न चान्नं
दत्ते यथौदुम्बरवाक्यशेषः ॥ ३१ ॥

मच्चित्तं शूर्पदर्वीघटपटपिठरासंग्रहेष्वेव सक्तं
स्वारस्येनानुशाक्तिं तदपि पराशिव त्वत्स्तुतौ योजयैतत् ।
शूर्पेणेत्यस्य शेषोऽखिलकवनगुरो ते हि इत्यस्ति वाक्यं
तत्रत्यो यो हिकारः सकलबुधवरैस्तद्वदेव न्ययोजि ॥ ३२ ॥

गुरुस्त्वं देवस्त्वं परमशिव मन्त्रोऽपि च भवान्
इति ब्रूते वेदस्तदिह विषयासक्तमनसा ।
कथं कर्तुं शक्यं जपनमपि न स्मारयसि चेद्
अनुष्ठेयानर्थान् स्मरयति हि मन्त्रव्यतिकरः ॥ ३३ ॥

त्वद्दत्तैश्वर्यभाजः परमशिव कथंकारमन्यान् सुरेन्द्रान्
याचे देहीति विष्णुद्रुहिणहरिमुखान् भिक्षुकान् भिक्षुकोऽहम् ।
अज्ञोऽपि द्वादशाहक्रतुविकृतिशतोक्थ्याङ्गभूतोऽपि चोक्थ्यो
ज्योतिष्टोमोक्थ्यधर्मानभिलषति न तु द्वादशाहोक्थ्यधर्मान् ॥३४॥

अम्ब त्वं परदेवता बलवतीत्येवंधिया त्वत्पदा-
म्भोजे चित्तमवीविशं भगवति त्वत्तोऽपि शूरेण तत् ।
द्रव्येणापहृतं किमद्भुतमिदं सन्न्यायतो यत्पय-
स्यामेये सकले (r लो) गुणा (णः) प्रसरति श्रीजैमिनेः संमतः॥३५॥

ज्ञानाकरेऽप्यविदितात्मनि सूक्ष्मवृत्तौ
शक्त्या विना परशिवे न हि नामरूपे ।
संभाविते विदुषि सत्प्रभुणेव तस्मात्
सैवेश्वरीति कविभास्कर आश्रितस्त्वाम् ॥ ३६ ॥

विधिविष्णुमुखामरोदयस्थितिनाशेषु शिवोऽप्यनीश्वरः ।
जगदम्ब तव त्वयं क्रमः क्षणमुद्दालकपुष्पभञ्जिका ॥ ३७ ॥

वस्तु प्रस्तुतमस्तु निस्तुलमहस्तोमास्तिता वास्तु नो
हस्तन्यस्तसमस्तपुस्तकभरध्वस्तासदेनस्तति ।
शस्तस्वस्तिकृदस्तदुस्तरतमः स्वस्तोकसौवस्तिकं
गीस्तोकस्तनयित्नु सुस्तनयुगं वास्तोष्पतिप्रस्तुतम् ॥ ३८ ॥

बगले परमशिवामृतसमरसकलिता त्वमेव किल ललिता ।
सुधया समरसभूता मितरामरुणा हरिद्रेव ॥ ३९ ॥

सर्वज्ञाः श्रुतयोऽपि याः परशिव त्वत्प्राणरूपाः प्रियाः
शृङ्गग्राहिकया त्रपाभृत इव त्वां न प्रजल्पन्ति ताः ।
अन्यानेव तु नेति नेति बहुशो वाचा निषेधन्ति चेत्
कोऽन्यस्त्वामिदमित्थमित्यनुवदेत् तत्रापि माद्दग्जनः ॥ ४० ॥

न मे शक्तिः श्रीमन्महिमपरमाणोरपि नुतौ
तथापि त्वद्भक्तिं व्यतनवमवष्टभ्य किमपि ।
न मञ्चाः क्रोशन्ति प्रवचनमथापि प्रववृते
यथा लोके भक्त्या परमशिव शक्त्या स्वगतया ॥ ४१ ॥

भो सर्वज्ञ कुमारक त्रिनयनाधिक्येच्छया कृत्तिका–
षट्कव्याजवशेन षड्वदनता सम्पादिता यद्यपि ।
एकास्यं त्वतिरिच्यते त्रिनयनन्यूनो भवान् सर्वथा
यस्मात् पञ्चदशेक्षणानि गिरिजानानेस्तव द्वादश ॥ ४२ ॥

पण्डामण्डनचण्डताण्डवबलादुद्दण्डस्य वै कुण्डलीट्
पातालान्निखिलानि यैः कविगुरू आनाकमुड्डायितौ ।
नाद्यापि त्रपया नताः प्रतिनिवर्तन्ते महीमण्डले
ते श्रीमन्नरसिंहनाथचरणाः[1] पायात्सुरायासतः ॥ ४३ ॥

ब्रह्माण्डकोटिजठरस्य बलमसौक्ष्म्या-
भावान्न सुन्दरतरत्वमनुप्रयुक्तम् ।
शङ्कामिमां मृगदृशां परिहर्तुकामः
श्रीविठ्ठलो[2] निजकटिं किमसौ मिमीते ॥ ४४ ॥

मातर्लक्ष्मीः स्वयम्भूर्वसति सरसिजेऽन्तस्त्वमप्यम्बुजस्था
विश्वं सृष्ट्वा स पैतामहपदमगमत् त्वं त्वभूर्लोकमाता ।
अस्त्वेतत् किन्तु तद्वत् परपुरुषतनौ नोचितस्ते निवासः
स्पर्धाबद्धादराणामुचितमनुचितं न स्फुरत्येव किञ्चित् ॥४५॥

कूपाकूपारकुल्यास्वथ च नदनदीखेयकासारवापी-
ष्वापातालं प्रविष्टैर्दशशतगुणितै रश्मिभिर्वारि भूरि ।
ग्राहं ग्राहं निषिञ्चन्नवसि दिनपते पादपान् पादहीनां-
स्तस्मात् किं वर्णयामो निरुपधिकरुणां दानशौर्यं च भानो ॥४६॥

साक्षाद्राक्षा समक्षा पतदमृतझरी माधुरीचातुरीभाङ्
मल्लीवल्लीमतल्लीकुसुमपरिमलाखर्वगर्वापहन्त्री ।
भाषा येषामशेषा प्रनटदजजटाजूटसम्भ्रान्तगङ्गा-
तुङ्गत्वङ्गत्तरङ्गध्वनिमधरयति श्रीगुरूंस्तान्नमामि ॥ ४७ ॥

आद्यैर्वर्णैः समस्तैरपि शिरसि धृतः सर्ववाचंयमानाम्
अन्तस्थः पूर्णतायाः परमधिकरणं बिन्दुभावस्य धाम ।
यस्य द्वैताद्विसर्गः कृतिभिरधिगतो नासिकामूलदेशे
ब्रह्मानुस्वारधर्मा स जयति यतिराट् सच्चिदानन्दशर्मा ॥४८॥

---

1 नरसिंहनाथ is the गुरु of भास्करराय.
2 विठ्ठल is भास्करराय's कुलदेवत.

प्रायो मीमांसकस्यैव पठन्मूर्ख इति प्रथा ।
उपादत्ते विवक्षितत्वात् संख्यावत्त्वेन यः पशुम् ॥ ४९ ॥

स्मार्तब्राह्मणगान् धर्मान् वैष्णवान्तरगानपि ।
न स्वीकरोत्यतः पापी राजाधिकृतवैष्णवः ॥ ५० ॥

काव्यालङ्करणज्ञमेव कविताकान्ता वृणोतां परम्
मीमांसानिपुणं नपुंसकधियात्याक्षीदनक्षी कथम् ।
येन व्रात्यपशोः स्वरस्य गदितं पुंस्त्वं विवक्षास्पदम्
प्राज्ञस्यापि मखादिसंस्कृततनोर्न स्वर्गकामस्य नुः ॥ ५१ ॥

आलोकेत्यकसूरिसंप्रतिपनीपणांध्वरीकारयन्
शब्दान् संसदि बम्भणीतकितरां चेच्चर्करीतानपि ।
कीर्तिस्तस्य वरीवृधीतकि जनाः सर्वेपि चाकथ्यति
सर्वे चाभिपनीपदीतकि न चेत् तेभ्यः सनीस्रस्यते ॥५२॥

णो न इति सूत्रमात्रं पाणिनिना नोचितं रचितम् ।
मूर्धन्योत्तमवर्णा अन्त्या दन्त्याः कृता येन ॥ ५३ ॥

श्लाघ्ये सर्वैर्गुणैरप्यवितरणपरे राजवत्येव भूमिः
सत्यो राजन्वती स्यादवितरि निभृतं दातरीत्यद्भुतं किम् ।
राज्ञा दूरं निरस्तः सदसि निजमुखाद्द्विप्रवृन्दापकर्ता
लुप्ताकारो यदन्तः प्रविशति जवतो राजवत्या नकारः ॥५४॥

अभ्यारतसहवासेन सम्प्राप्तमपि पाणिनिः ।
लक्ष्मीवाचकमीकारं दरिद्रस्य निरस्यति ॥ ५५ ॥

मौलिरत्नं यच्छिरसि ब्रह्माण्डस्तद्भवो गोलः ।
तद्गलगलिता वेदा गुरुलघु तदिदं शिवः सर्वम् ॥ ५६ ॥

इष्यमाणविरुद्धाप्तिर्न विषादनलक्षणम् ।
अव्यापकं यतः शम्भोरलङ्कारे विषादने ॥ ५७ ॥

योऽयोध्यां नगरीं श्रितो भुवि ककुत्स्थानाश्रितो गाधिराट्
जन्मात्तक्रतुहीरविग्रहमना यो वाहिनिद्राकरः ।
प्राज्ञान् पुण्यजनान् भृशं कलयति द्राक्पक्षपातेन यो
रामस्त्वां सुकृतैकसेतुरवतात्त्वन्नामकर्मा हरिः ॥ ५८ ॥

सूर्येन्दूत्तमधामकातनुसमित्संहारहेते जगद्-
भूतेः कारण रोहिताश्व बहुशः संजातवेदस्मृते ।
पातु त्वत्कुट्टितारिप्रलुठितभ्रुकुटीकोटिसंघट्टनोत्थ-
स्फारस्फीतस्फुलिङ्गैर्युधि शिवमयनं क्ष्मारतिं त्वां महीश ॥ ५९ ॥

नागपूगावृतं भव्यं सूरतं धूम्रकेतकम् ।
तमाखुपत्रं भूपाल हृदि न्यस्य सुखी भव ॥ ६० ।

शम्भुराज शम्भुमूर्ति डिम्बनाम बम्भणीतु
शम्भरेण सम्भवत्वृतम्भरोपलम्भताम् ।
कुम्भिसंघकुम्भभेदरम्भणोद्धुरं भुज-
द्वयं भवत्त्वदम्भतः परं भजस्व शाम्भवीम् ॥ ६१ ॥

सुपर्वलोकतर्वधीशगर्वरूपपर्वतस्य
सर्वदेवपर्वणैव चर्वणं प्रकुर्वतः ।
शर्वरीडखर्वधाम धूर्वहं यशोर्वराज-
सार्वभौम सर्वतोऽस्तु...... ॥ ६२ ॥

धर्महीनभर्मराश्यधर्मवृत्तदुर्मदा-
रिवर्मममर्मचर्मदारिकर्मकेषुकार्मुके ।
धर्मकालकर्मसाक्षिधर्मणित्वयीमहे-
ऽयकर्मणेह शर्मणैव नर्मदेव कुर्महे ॥ ६३ ॥

अगेवान्तकीर्णसूरितर्णकालवर्णपूग-
वर्णनीयवर्णमात्रकर्णनीयचूर्णिका ।

*कर्णभूप तीर्णपाप पूर्णनिःसुवर्णताब्धि-
कर्णधार पूर्णमेघ घूर्णितोऽरिरूर्णुतात् ॥ ६४ ॥

‡रुद्रभूप भद्रमस्तु यद्रिपूनुपद्रवै-
रतिद्रुतेन विद्रवय्य काद्रवेयपूर्दरीम् ।
तद्रमाविनिद्रणेन मुद्रिता दरिद्रता
दरिद्रितान्तरद्रिभिद्रनद्रुमां न चाद्रिये ॥ ६५ ॥

सत्यवत्स्वपत्यनुत्यनित्यकृत्यभृत्यवत्य
सत्यसत्यहृत्स्वहृत्यमात्यभृत्यवत्यदः ।
सद्य उद्यदुपद्य हृद्यवद्यभेद्यहृद्य
गद्यपद्यकाद्यनुद्यमाद्यसद्यशोऽवति ॥ ६६ ॥

वदत्वं न वदान्येषु वदान्यत्वं वदेषु न ।
चित्रं त्वयि महाराज वदान्योऽसि वदोऽप्यसि ॥ ६७ ॥

प्राकृतैरनपेक्षोपि शेषैः कृप्तोपकारकैः ।
नव्यैर्भवसि साकाङ्क्षः साङ्ग्रहण्यामनैरिव ॥ ६८ ॥

प्रातिस्विकं न ते शक्या गुणा वर्णयितुं बुधैः ।
विद्वद्वाक्यं अशेषेण समुदायानुवादकम् ॥ ६९ ॥

×वीरश्रीरामचन्द्र क्षितितिलक यशोराशिना तावकेन
त्रैलोक्ये श्वेतिमानं कलयति यमुनाप्यत्यजन्नैजरूपम् ।
सन्दिग्धस्तीर्थराजोऽप्यभवदथ पुनः सा नदी त्वत्प्रतापाद्
आमूलाग्रे यथावत् समजनि यवनीसंघट्टनीरपूरैः ॥ ७० ॥

कल्पक्षोणिरुहश्च कल्पलतिकाश्चिन्तामणिः कामधुक्
सर्वे संमिलिता यदीयतुलनां नैवाधिरोढुं क्षमाः ।
ते याता अत एव लाघववशादूर्ध्वां दिवं गौरवाद्
एष क्षोणिपतिस्त्वधो भुवमिति स्पष्टं घटे धीमताम् ॥ ७१ ॥

---

* कर्णभूप = कानोजी (evidently आंग्रे) according to a marginal note in the MS.

‡ Is रुद्रभूप the same as शाहू ?

× रामचन्द्र क्षितितिलक is very probably रामचन्द्रराव जाधव, one of भास्करराय's disciples.

कृष्णे[1] क्षोणिपते भयादरिपुरद्वारेषु संमुद्रितं-
ष्वेका द्वारवती तवैव नगरी जाता महीमण्डले ।
अत्रैवान्यपुरप्रवेशविरहात् पद्मापि सद्माकरोत्
तत्स्नेहात् परिखीभवत्यनिमिषव्रातीवृतो वारिधिः ॥ ७२ ॥
नानादिग्गतमार्गणान् सुमनसः प्रद्युम्नभावं च ते
लावण्यं च तनोर्निरीक्ष्य नृपते सुत्युर्भरत्याप्तता ।
साक्षात्त्वां स्मरमूचिरे युवतयो मुग्धाः किलैता यतः
शस्त्री स्त्रीक्रियते त्वया न तु पुनः शस्त्रीभवन्ति स्त्रियः ॥७३॥
हे राजन् प्रभवादतिव्यवहितस्त्वास्तामयं विक्रमस्
तस्मात्तु व्यवधानमर्हतितरां नो सर्वजित् पार्थिवः ।
यस्मात् त्वत्प्रभवात् त्रयोदशसमास्वभ्यागतो विक्रमः
पश्चादेव हि सर्वजित्त्वमभवस्तास्मिन् क्षणे पार्थिवः ॥ ७४ ॥
जन्म स्वच्छकुले करे नरहरेर्वासस्तव त्वं श्रियाः
सर्वस्वं कविकामयोः परिमलो जागर्ति लोकम्पृणः ।
सत्येवं कमल त्वदीयवदनं यत् कुञ्चितं दृश्यते
तन्नूनं द्विजराजधीकवलितस्त्वं भास्करस्योदये ॥ ७५ ॥
राजंश्चन्द्रे[2] श्रियो वृद्धौ भास्करं दूरतस्त्यजन् ।
अतीव जडतां प्राप्य कलङ्कमकरोः स्फुटम् ॥ ७६ ॥
रामक्षोणिभुजो[3] मितिं च समितिं तस्यापि संख्यावतः
संख्यावन्निवहान् वनीयकगणान् वीक्ष्यावनीपानपि ।
राज्यं वश्यमवश्यमप्यातितरां रुद्धान्निरुद्धान्नृपान्
आलोलोक्यकसास्मिता अपि वयं भूयस्तरां विस्मिताः ॥७७॥
सा तारा या जडं साङ्कं श्रिता त्यक्त्वा गिरां पतिम् ।
बलान्नीतापि गुरुणा संत्यक्तैव बुधेन या ॥ ७८ ॥

---

1 कृष्ण क्षोणिपति is perhaps the same as कर्णभूप above.
2 राजा चन्द्र is perhaps चंद्रराव जाधव one of भास्करराय's disciples.
3 राम is रामचन्द्रराव जाधव.

अधरीकृतामृता ते जयति श्रुतिसीमलङ्घिनी सखि दृक् ।
श्रुतिसारमेयरूपममृतसर्वस्वं किंचिद् ब्रह्म ॥ ७९ ॥

पतिमात्रगामिनीनां मुखेऽमृतं नैव रसिकजनपेयम् ।
अन्यत्र सङ्गतानामवश्यपेयं यथा स्रवन्तीनाम् ॥ ८० ॥

दृष्टा स्पृष्टा श्रुता वापि भ्रामयत्येव मे मनः ।
रमणीयगुणा तन्वी कशेव तुरगोत्तमम् ॥ ८१ ॥

कोकनदीयं रङ्गं सुमुखि [त्व] दृशैवमाहार्षीः ।
तेन सुरङ्गदृशं त्वां कथमिव कवयः कुरङ्गदृशमाहुः ॥८२॥

अङ्गारामिशिखायोगान्मा [भू]न्म्लानं मुखाम्बुजम् ।
करोत्येवं धिया माध्वी साध्वी चन्दनबिन्दुवत् ॥ ८३ ॥

बाले बालकवेरेव कर्कन्धूभ्रमदौ कुचौ ।
अस्माकं तु दृढं तन्वि करमर्दस्मृतिप्रदौ ॥ ८४ ॥

मधुकर तव धैर्यं केन वा वर्णनीयं
यदधरमधुपानं पद्मिनीनां करोषि ।
खरतरकरभाजि प्राणिनां कर्मसाक्षि-
ण्यतिगतिमति कान्ते जागरूकेऽपि सूरे ॥ ८५ ॥

पद्मिनि पश्यति सत्यपि पद्मिनि मधुपैः प्रभाषसे स्वैरम् ।
उचितं तत्किल हरिणा रचितं तेषां तत्रापि नैर्मूल्यम् ॥ ८६ ॥

विलसत्सुवर्णपूगान्यथ च सुधाढ्यानि वदनकमलानि ।
.... ॥ ८७ ॥

क्वचिन्मकरभीकरं क्वचन कर्कटोत्कर्कशं
क्वचित्तरणिदुस्तरं क्वचिदुदीर्णपूर्णोडुपम् ।
[क्व]चिद् ग्रहपरिग्रहं क्वचन पीनमीनादिभा-
गपारमिह सागरे किमिदमम्बरं शम्बरम् ॥ ८८ ॥

कमले कमलोत्पत्तिः श्रूयते न तु दृश्यते।
दृष्टं शम्भोः पदाम्भोजे श्रीविष्णोर्नयनाम्बुजम् ॥ ८९ ॥

जल्पाकनूपुरविभूषितपादपत्रानल्पाककान्तिधवलीकृतकेलिसद्मा।
तस्मात्समुत्थितवती मृदुतूलकल्पादल्पावमानमरविन्दमुखी चकार ॥९०॥

आसीज्जनस्य मुहुरुद्यमतो नवोढा
केलीगृहं प्रति कथंचिदपि प्रयाता।
नीविं प्रति प्रहितहस्तमवेक्ष्य कान्त-
मल्पावमानमरविन्दमुखी चकार ॥ ९१ ॥

अधिजलधि शयानः पातु पक्षीशयानः
श्रितजनवशयानः कान् सुधामाशयानः।
सुरवरदशयानः पापहानाशयानः
भवभयविशयानः पूरयित्वाशयानः ॥ ९२ ॥

उत्स्वप्नमन्यललनालपितं लपन्तं
पर्यङ्क एव मणिदामभिराशु बद्ध्वा।
स्वाधीनवल्लभतया तरसैव जाते
चन्द्रोदये विरहिणी रमणं मुमोच ॥ ९३ ॥

नासाद्वारा योगिनां प्राणवायुर्
ब्राह्मं रन्ध्रं बेभिदीति स्वकीयम्।
धन्यो योगस्त्वावकीनो ह्यपानो
यत्सर्वेषां ब्रह्मरन्ध्राणि भेत्ति ॥ ९४ ॥

अधरयति तवौष्ठः पक्वबिम्बीफलानि
प्रवहति रदपङ्क्तिर्दाडिमीबीजशोभाम्।
यदुपवसतिमात्रादान्तरस्फोटकास्त्र-
द्विगुणतनु तदङ्ग्यादार्तवं त्वामपीक्ष्य ॥ ९५ ॥

स्मरणे तव शब्दोदसरस्वति सरस्वति ।
सम्प्रति स्याददेहस्थं मरणे किं तदा स्थितम् ॥ ९६ ॥

विनायकध्वजार्चितं नमामि जीविनायकम् ।
विनायकं विनायकं विनायकं तरेन्न ना ॥ ९७ ॥

मन्येहमनलं यस्मै गुणानां गणनायकम् ।
विनायकं सायकं च तद्भजामि विनायकम् ॥ ९८ ॥

आद्यूनः स्वमुखन्यूनो गदीशसहितः पुरः ।
भूयादभीष्टफलदः स ते गजमुखः प्रभो ॥ ९९ ॥

समस्तु मदनः शम्भौ तुष्टे दानवकर्मणा ।
शरणध्वस्तदनुजे देवेशे निर्गते सति ॥ १०० ॥

* [यानीह पा]पानि मया कृतानि
तानीश सर्वाण्यधुना क्षमस्व ।
आसन्नमृत्योर्निजवैरिणोऽपि
सन्तः क्षमन्ते सकलापराधान् ॥ १९६ ॥

रुद्राक्षाढ्यगलो विभूतिधवलो गौरीश शम्भो शिव
श्रीकण्ठैकवरो विमुक्तकवचो नाथोदितार्द्रश्रुतिः ।
अम्बादोलितवैरमारुतभवद्गङ्गातरङ्गावली-
संख्यापूर्तिकरोदरत्रिवलिकः कायं त्यजेयं सदा ॥

इति श्रीमद्भारत्युपाख्यश्रीमद्गम्भीरराजभारतीदीक्षितात्मज-
भास्कररायप्रणीतं मधुराम्लकाव्यं समाप्तम् ॥

---

* Here there appears to be a break in the MS. This is also shown by the fact that this stanza is numbered (not 101 but) 196.

Index of stanzas.

ORIENTAL THOUGHT

The organ in advance of proposed Academy for th romotion of Aryan culture to be founded by th rust that is being created by H. H. Jagadguru aṅkarācārya [Dr. Kurtkoti] with the help of some of is admirers, in the near future. The draft of the Trust eed which is under preparation will be published s soon as it is ready.

Oriental Thought is intended to promote Aryan ulture by publishing critical and explanatory articles, iscussions, notices of books, and notes on allied subjects.

GENERAL INSTRUCTIONS TO CONTRIBUTORS.

(1) Contributions should be type-written (with ouble spacing) on only one side of the paper.

(2) Lengthy extracts and quotations from the iginal Sk. and Pk. works should be written in evanāgarī characters. In other cases the system of ansliteration adopted by the Bhandarkar Orienta esearch Institute should be followed.

(3) Names of modern authors should be indicated the manuscripts by double underlining. Titles of oks and journals should be indicated by single derline. Titles of articles mentioned in the contribu- ons should be enclosed within double quotation marks.

(4) Footnotes should be serially numbered and ould be given all of them at the end of the ticle (and not on each page).

(5) It is presumed that contributions sent for blication in Oriental Thought are original and not bmitted for publication elsewhere.

(6) The copy-right of all contributions published Oriental Thought will vest jointly in the Author d the (proposed) Academy.

(7) Twenty -five off-prints will be given to contri- tors free of charge. Additional off -prints may also supplied at the cost of the contributors, provided order is placed for the same along with the rrected proofs.

(8) All communications, contributions, book-notices, oks for review etc. should be addressed to the itor, Oriental Thought, Kunj-villa, Agra Road, Nasik.